# Prakarantaram Bhagamalini Rajasvala Stotram

# પ્રકારાન્તરં ભગમાલિની રજસ્વલાસ્તોત્રમ્

## Document Information

Text title : Prakarantaram Bhagamalini Rajasvala Stotram

File name : prakArAntarambhagamAlinIrajasvalAstotram.itx

Category : devii, stavarAja, otherforms, devI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Latest update : March 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 10, 2024

*sanskritdocuments.org*

Prakarantaram Bhagamalini Rajasvala Stotram

# પ્રકારાન્તરં ભગમાલિની રજસ્વલાસ્તોત્રમ્

શ્રી પાર્વત્યુવાચ -
દેવીભક્તશ્ચદેવેશાચારઃ કીદૃશો ભવેત્ ।
ધર્માર્થકામમોક્ષાણાં સિદ્ધિસ્તસ્ય કથં ભવેત્ ॥ ૧॥

ઈશ્વરોવાચ-
સ્ત્રીસઙ્ગઞ્ચ સદાભાવ્યં સુન્દરીતિ વિશેષતઃ ।
સ્ત્રિયોદેવા સ્ત્રિયોઃ પ્રાણા સ્ત્રિય એવમમીષિણઃ ॥ ૨॥

તાસાં પ્રહારં નિન્દાચ કૌટિલ્યં નૈવ કારયેત્ ।
સર્વથા નૈવ કર્તવ્યમ્મન્યથા સિદ્ધિરોધકૃત્ ॥ ૩॥

સ્ત્રીમયઞ્ચ જગત્સર્વં ભાવયેન્મતોમાન્તરઃ ।
સુન્દરીં યુવતીં વીક્ષ્યનમસ્કુર્યાત્સમાહિતઃ ॥ ૪॥

બાલાં વાયૌવનોન્મત્તાં વૃદ્ધાં વા સુન્દરી તથા ।
કુચ્છિતાં વા મહાદુષ્ટાં સર્વોદેવીં વિભાવયેત્ ॥ ૫॥

સ્ત્રીદેષો નૈવ કર્તવ્યઃ પ્રીયન્તાસાં સમાચરેત્ ।
સ્ત્રીયઙ્ગચ્છન્ન ધ્યાયન્કૃતાર્થાસ્મીતિભાવયેત્ ॥ ૬॥

ઋતુવત્યા ભગં પશ્યન્ જપતેયાદિ સાધકઃ ।
કેવલં ગુપ્તભાવેન સતુવિદ્યાનિધિર્ભવેત્ ॥ ૭॥

સંસ્કૃતાઃ પ્રાકૃતાઃ શબ્દા લૌકિકા વૈદિકાસ્તથા ।
વશમાયાન્તિ તે સર્વે સાધકસ્ય ચ નાન્યથા ॥ ૮॥

રજસ્વલાધોમુખન્દૃષ્ટ્વા સર્વપાપં વ્યપોહતિ ।
ભાષણઙ્કુરુતેરાજ અશ્વમેધાદિકં ફલમ્ ॥ ૯॥

તસ્ય સ્પૃશ્યમાત્રેણ લભ્યતે ફલચતુર્વિધમ્ ।
યસ્ય સઙ્ગમમાત્રેણ ત્રૈલોક્યક્ષોભનક્ષમઃ ॥ ૧૦॥

શ્રદ્ધાયાં પૂજિતં ભક્ત્યો ભગં સ રજશોભિતમ્ ।
ન્યાસઙ્કૃત્વા સ્વદેહેચ કલાભિઃ કામષોડશૈઃ ॥ ૧૧॥

માત્રિકાન્યાસ દેહેષુ અનુલોમ વિલોમતઃ ।
શિવરૂપં વિચિન્ત્યસ્ય ભગપૂજા સમાચરેત્ ॥ ૧૨॥

કોટિજન્માર્જિતૈ પુણ્યૈ ભક્ત્યાયાં પૂજયેદ્ભગમ્ ।
વિષેષ્ય પૂજ્યતે યોનિપુષ્પસઙ્ખ્યાનવિદ્યતે ॥ ૧૩॥

મહદ્યત્નેન દેવેશિ પુષ્પવન્તિ સુલક્ષણઃ ।
પુષ્યતે દેવ્યા ભક્ત્યા ચ પિશિતાલિઙ્ગસંયુતમ્ ॥ ૧૪॥

નવપાત્રન્તુ વિધિવત્ સ્વયં ભક્ત્યાદ્યરક્ષયા ।
પિબેત્શેષે સુરાજ્યોતિ તજ્જાડ્યં હરતે ધ્રુવમ્ ॥ ૧૫॥

વૃત્યૈભૂતો સ્વયં ભક્ત્યા વિકલ્પેન ચ ચેતસામ્ ।
પુષ્પૈર્ભૂતં ભગં પૂજ્ય તન્મધ્યે લિઙ્ગવિક્ષિપેત્ ॥ ૧૬॥

સ્તોત્રપાઠં મૈથુનં ચ ક્રિયતે જપ પૂર્વકમ્ ।
યાવત્ ભુક્તં સુખં જાપ્યં જપિત્વા ચ સુરેશ્વરિ ॥ ૧૭॥

મહાપીઠસ્ય મથનં કુર્યાદ્વૈ જપપૂર્વકમ્ ।
યાવદ્રેતં સ્વયમ્પૂર્યાત્ તાવજ્જપ્ત્વા સુરેશ્વરી ॥ ૧૮॥

વિસર્જને ચ પીઠસ્ય પુનઃ પાત્રં નિવેદયેત્ ।
એવં કૃતે તુ વીરેણ શિવતુલ્યો ભવેન્નરઃ ॥ ૧૯॥

અત્યન્ત ગોપ્યં દેવેશિ તસ્ય યોનિ વિનિક્ષિપેત્ ।
અપ્રકાસ્ય કુપાત્રસ્ય ગોપ્યાગોપ્યકૃતં શુભમ્ ॥ ૨૦॥

પ્રકાશં પરમાદ્રહસ્યં સદ્યોમૃત્યુઃ ન સંશયઃ ।
ઇન્દ્રલોકેન દેવેશિ ગોપ્યાત્સફલં મહત્ ॥ ૨૧॥

ભક્ત્યા ચ યમતેવીરો પૂજ્યતે સાધકોભવેત્ ।
રતિકાલે વિશેષેણ શિવતુલ્યો ભવેન્નરઃ ॥ ૨૨॥

ઇતિ ત્રયોદશ શ્લોકૈઃ સ્તવનં પરમાદ્ભુતમ્ ।
રજસ્વલા સમીપેતુ પઠ્યતે સર્વસિદ્ધિદે ॥ ૨૩॥

સત્યં સત્યં પુનઃ સત્યં સત્યં સત્યં ન સંશય ।
સમ્પુષ્પં ભગપૂજાચ બ્રહ્મલોકેડપિદુર્લભમ્ ॥ ૨૪॥

॥ ઇતિ શ્રી ગર્ભકુલાર્ણવે ઈશ્વરપાર્વતીસંવાદે
ભગમાલિની રજસ્વલાસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શ્રી લલિતામ્બાર્પણમસ્તુ ।

Proofread by rajesh thyagarajan

*Prakarantaram Bhagamalini Rajasvala Stotram*

pdf was typeset on March 10, 2024

Please send corrections to *sanskrit@cheerful.com*